श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीसुदर्शनसूरिभिरनुगृहीताः

# ॥ श्रीभाष्यकारस्तुतिश्लोकाः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीभाष्यकारस्तुतिश्लोकाः ॥

यतीन्द्रकृतभाष्यार्था यद्व्याख्यानेन दर्शिताः।
व्यासं सुदर्शनार्यं तं वन्दे कूरकुलाधिपम्॥

तस्मै रामानुजार्याय नमः परमयोगिने।
यः श्रुतिस्मृतिसूत्राणां अन्तर्ज्वरमशीशमत्॥ १ ॥

प्रपद्ये प्रणवाकारं भाष्यं रङ्गमिवापरम्।
परस्य ब्रह्मणो यत्र शेषित्वं स्फुटमीक्ष्यते॥ २ ॥

अविस्तृतास्सुगम्भीराः रामानुजमुनेर्गिरः।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढम्॥ ३ ॥

भाष्यं चेत् व्यवृणोत् स्वयं यतिपतिः व्याख्यानवाचां तथा
गाम्भीर्यादनवस्थितिः मितमतिर्दूरे जनस्तद्गिराम्।
प्रष्टव्यः कथमीश्वरः स हि न नः प्रत्यक्षरूपो दृशां
तद्भाष्यं स च भाष्यकृत् स च हरिः संयक् प्रसीदन्तु नः॥ ४ ॥

॥ इति श्रीभाष्यकारस्तुतिश्लोकाः संपूर्णाः ॥

www.prapatti.com